**2018**

**M.A.**

**1st Semester Examination**

**SANSKRIT**

**PAPER – SAN – 102**

***Full Marks : 50***

***Time : 2 Hours***

***Answer all questions***

***The figures in the right hand margin indicate marks***

***Candidates are required to give their answers in their own words as far as practicable***

***Illustrate the answers wherever necessary***

***सर्वे प्रश्नाः सुरगिरा समाधेयाः।***

**1. चतुर्णां प्रश्नानामुत्तरं देयम् ।** **4X2**

क) शतपथनामकरणे किं वीजम् ? तस्य ब्राह्मणस्य कति शाखाः ?

ख) शतपथब्राह्मणे कति महायज्ञा आलोचिताः ? काश्च ताः ?

ग) नलम् अजिनम् इत्यनयोः पदयोः प्रकृतिप्रत्ययं विलिख्य तस्यार्थः सायणदिशा लिखत।

घ) अजीगर्तस्य कति पुत्राः ? तेषां नामानि लिख्यन्ताम् ।

ङ) **'नेदं यदिदमुपासते'** इत्यत्र नेदम् इति पदेन कस्य बोधो भवति ?

च) 'नाहं मन्ये सुवेदेटि ' इत्यत्र सुवेदेटि इति पदस्य कोऽर्थः ?

छ) नचिकेतसः पितुर्नाम किम् ? स पुत्रं किम् आदिदेश ?

ज) कठोपनिषदि उक्तं द्वितीयवरं किम् ?

*(Turn Over)*

**2. यथेच्छं चतुर्णां व्याख्या कार्या ।** **4X4**

क) अहरहर्भूतेभ्यो वलिं हरेत् । तथैतं भूतयज्ञं समाप्नोति ।

ख) अहरहः स्वाहा कुर्यादा काष्ठात् तथैनं ह देवयज्ञं समाप्नोति ।

ग) कलिः शयानो भवति सञ्जिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरंश्चरैवेति ॥

घ) चरन्वै मधु विन्दति चरन्स्वादुमुदुम्वरम् ।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति ॥

ङ) श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचा ह वाचं स उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रत्येतस्माल्लोकादमृता भवन्ति ॥

च) यत् प्राणेन प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

छ) शान्तसंकल्पः सुमना यथा स्यात् वीतमन्युर्गौतमो माऽभिमृत्यो।
त्वत्प्रसृष्टं माऽभिवदेत् प्रतीत एतत् त्रयाणां प्रथमं वरं वृणे ॥

ज) श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः ।
श्रोयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते॥

**3.कयोश्चिद् द्वयोः उत्तरं लेख्यम् -** **8X2**

क) पञ्चानां महायज्ञानां नामान्युल्लिख्य ब्रह्मयज्ञस्य स्वरूपं फलञ्च संक्षेपेण शतपथोक्तदिशा विव्रियताम् ।

ख) शुनःशेपोपाख्यानस्य सामाजिकदृष्ट्या किं तात्पर्यं तत् प्रस्तूयताम् ।

ग) केनोपनिषदमवलम्ब्य आत्मतत्त्वम् आलोच्यताम् ।

घ) उपनिषच्छब्दस्य कोऽर्थः ? उपनिषच्छब्देन कथं ग्रन्थस्य ग्रहणं भवति ?
कठोपनिषदि नचिकेतसा प्रार्थितस्य तृतीयवरस्वरूपं विचार्यताम् ।

**(*Internal Assessment :10 marks*)**

***समाप्तम्***